# Shri Gopala Stotram

# શ્રીગોપાલસ્તોત્રમ્

## Document Information

Text title : Shri Gopala Stotram 05 19

File name : gopAlastotram.itx

Category : vishhnu, krishna, stotra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-19

Latest update : October 9, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 9, 2021

*sanskritdocuments.org*

# શ્રીગોપાલસ્તોત્રમ્

વક્ષસ્થલે મણિમયાભરણાભિરામે
  કલ્યાણકલ્પલતિકાં કમલાં વહન્તમ્ ।
વક્ત્રે દધાનમતિસુન્દરમન્દહાસં
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૧॥

વેદાન્તમસ્તકગિરાં પ્રથમાભિધેયં
  ગોપાલબાલવનિતાભવને નિધેયમ્ ।
નન્દાઙ્ગનાનયનપઙ્કજભાગધેયં
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૨॥

કાઞ્ચીકલાપકમનીયકટિપ્રદેશં
  કાન્તાસહસ્રકુચમણ્ડલમણ્ડનીયમ્ ।
કામં વિશાલનયનં કરુણૈકસિન્ધું
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૩॥

આજાનુદીર્ઘભુજમઞ્ચિતકઞ્જનાભં
  આલોલનેત્રમસિતોત્પલકર્ણપૂરમ્ ।
આરૂઢપક્ષિપતિમાશ્રિતકાલમેઘં
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૪॥

ફુલ્લાતસીકુસુમકાન્તિમુષં કુમારં
  સૌન્દર્યશેવધિમુદારગુણાભિરામમ્ ।
લક્ષ્મ્યાલયં કલિતકૌસ્તુભમમ્બુજાક્ષં
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૫॥

હસ્તારવિન્દયુગલીધૃતશઙ્ખચક્રં
  પીતામ્બરં મકરકુણ્ડલદીપ્તગણ્ડમ્ ।
હારાભિરામમભિરામકરાઙ્ગુલીયં
  સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૬॥

કન્દર્પકાન્તિમરુણાધરમાયતાક્ષં
    કસ્તૂરિકાતિલકશોભિતફાલભાગમ્ ।
પૂર્ણેન્દુબિમ્બવદનં મધુરાવલોકં
    સઞ્ચિન્તયામિ નૃપગોપકુમારવેષમ્ ॥ ૭॥

બાલં બાલં બાલમેવ સ્મરામઃ
    નીલં નીલં નીલમાલોકયામઃ ।
ગોપં ગોપં ગોપમેવાશ્રયામઃ
    બાલં નીલં ગોપવેષં ભજામઃ ॥ ૮॥

વીક્ષા નીલા લકાવૃતમુખં તવ કુણ્ડલશ્રી-
    ગણ્ડસ્થલાધરસુધાં સદયાવલોકમ્ ।
દત્તાભયં ચ ભુજદણ્ડયુગં વિલોક્ય
    વક્ષઃ શ્રિયો વિહરણં ચ ભવામ દાસાઃ ॥ ૯॥

ઇતિ શ્રીગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Gopala Stotram*

pdf was typeset on October 9, 2021

Please send corrections to *sanskrit@cheerful.com*